# श्रीमद् भागवत रसिक कुटुंब

## राधिका अष्टकम्

**श्री कृष्णदास कविराज विरचितं राधिका अष्टकम्**

**कुङ्कुमाक्तकाञ्चनाब्ज गर्वहारि गौरभा,**
**पीतनाञ्चिताब्जगन्धकीर्तिनिन्दसौरभा ।**
**वल्लवेशसूनु सर्ववाञ्छितार्थसाधिका,**
**मह्यमात्मपादपद्मदास्यदाऽस्तु राधिका ॥ 1॥**
**मुझको अपनी ही शरण में ले लो प्यारी राधिका ,श्री राधिका**

**कौरविन्दकान्तनिन्दचित्रपत्रशाटिका,**
**कृष्णमत्तभृङ्गकेलि फुल्लपुष्पवाटिका ।**
**कृष्णनित्यसङ्गमार्थपद्मबन्धुराधिका,**
**मह्यमात्मपादपद्मदास्यदाऽस्तु राधिका ॥ 2॥**
**मुझको अपनी ही शरण में ले लो प्यारी राधिका ,श्री राधिका**

**सौकुमार्यसृष्टपल्लवालिकीर्तिनिग्रहा,**
**चन्द्रचन्दनोत्पलेन्दुसेव्यशीतविग्रहा ।**
**स्वाभिमर्शवल्लवीशकामतापबाधिका,**
**मह्यमात्मपादपद्मदास्यदाऽस्तु राधिका ॥ 3॥**

मुझको अपनी ही शरण में ले लो प्यारी राधिका ,श्री राधिका

विश्ववन्द्ययौवताभिवन्दतापि या रमा,
रूपनव्ययौवनादिसम्पदा न यत्समा ।
शीलहार्दलीलया च सा यतोऽस्ति नाधिका,
मह्यमात्मपादपद्मदास्यदास्तु राधिका ॥ 4॥
मुझको अपनी ही शरण में ले लो प्यारी राधिका ,श्री राधिका

रासलास्यगीतनर्मसत्कलालिपण्डिता,
प्रेमरम्यरूपवेशसद्गुणालिमण्डिता ।
विश्वनव्यगोपयोषिदालितोपि याऽधिका,
मह्यमात्मपादपद्मदास्यदाऽस्तु राधिका ॥ 5॥
मुझको अपनी ही शरण में ले लो प्यारी राधिका ,श्री राधिका

नित्यनव्यरूपकेलिकृष्णभावसम्पदा,
कृष्णरागबन्धगोपयौवतेषु कम्पदा ।
कृष्णरूपवेशकेलिलग्नसत्समाधिका,
मह्यमात्मपादपद्मदास्यदाऽस्तु राधिका ॥ 6॥
मुझको अपनी ही शरण में ले लो प्यारी राधिका ,श्री राधिका

स्वेदकम्पकण्टकाश्रुगद्गदादिसञ्चिता,
मर्षहर्षवामतादि भावभूषणाञ्चिता ।
कृष्णनेत्रतोषिरत्नमण्डनालिदाधिका,

महृममात्मपादपद्मदास्यदाऽस्तु राधिका ॥ 7॥
मुझको अपनी ही शरण में ले लो प्यारी राधिका ,श्री राधिका

या क्षणार्धकृष्णविप्रयोगसन्ततोदिता-,
नेकदैन्यचापलादिभाववृन्दमोदिता ।
यत्नलब्धकृष्णसङ्गनिर्गताखिलाधिका,
महृममात्मपादपद्मदास्यदाऽस्तु राधिका ॥ 8॥
मुझको अपनी ही शरण में ले लो प्यारी राधिका ,श्री राधिका

अष्टकेन यस्त्वनेन नौति कृष्णवल्लभां(न्),
दर्शनेऽपि शैलजादियोषिदालिदुर्लभाम् ।
कृष्णसङ्गनन्दतात्मदास्यसीधुभाजनं(न्),
तं(ङ्) करोति नन्दतालिसञ्चयाशु सा जनम् ॥ 9॥
मुझको अपनी ही शरण में ले लो प्यारी राधिका ,श्री राधिका

। इति श्रीकृष्णदासकविराजविरचितं श्रीराधिकाष्टकं सम्पूर्णम् ।

## श्रीराधा षोडश नामावली स्तोत्रम्

राधा रासेश्वरी रास- वासिनी रसिकेश्वरी ।
कृष्णप्राणाधिका कृष्ण- प्रिया कृष्णस्वरूपिणी ।।1।।

कृष्णवामाङ्गसम्भूता, परमानन्दरूपिणी ।
कृष्णा वृन्दावनी वृन्दा, वृन्दावनविनोदिनी।।2।।

चन्द्रावली चन्द्रकान्ता, शरच्चन्द्रप्रभानना ।
नामान्येतानि साराणि तेषामभ्यन्तराणि च ।।3।।

राधेत्येवं(ञ्) च संसिद्धौ, राकारो दानवाचकः।
स्वयं(न्) निर्वाणदात्री या, सा राधा परिकीर्तिता ।।4।।

रासेश्वरस्य पत्नीयं(न्), तेन रासेश्वरी स्मृता ।
रासे च वासो यस्याश्च, तेन सा रासवासिनी ।।5।।

सर्वासां रसिकानां(ञ्) च, देवीनामीश्वरी परा ।
प्रवदन्ति पुरा सन्तस्- तेन तां रसिकेश्वरीम् ।।6।।

प्राणाधिका प्रेयसी सा, कृष्णस्य परमात्मनः ।
कृष्णप्राणाधिका सा च, कृष्णेन परिकीर्तिता ।।7।।

कृष्णस्यातिप्रिया कान्ता, कृष्णो वास्याः(फ्) प्रियः(स्) सदा ।
सर्वैर्देवगणैरुक्ता, तेन कृष्णप्रिया स्मृता ।।8।।

कृष्णरूपं संनिधातुं(यँ) , या शक्ता चावलीलया ।
सर्वांशैः(ख्) कृष्णसदृशी, तेन कृष्णस्वरूपिणी ।।9।।

वामाङ्गार्द्धेन कृष्णस्य , या सम्भूता परा सती ।

कृष्णवामाङ्गसम्भूता, तेन कृष्णेन कीर्तिता ।।10।।

परमानन्दराशिश्च, स्वयं मूर्तिमती सती ।
श्रुतिभिः(ख्) कीर्तिता तेन, परमानन्दरूपिणी ।।11।।
कृषिर्मोक्षार्थवचनो, ण एवोत्कृष्टवाचकः ।
आकारो दातृवचनस्- तेन कृष्णा प्रकीर्तिता ।।12।।

अस्ति वृन्दावनं(यँ) यस्यास्- तेन वृन्दावती स्मृता ।
वृन्दावनस्याधिदेवी , तेन वाथ प्रकीर्तिता ।।13।।

सङ्घः(स्) सखीनां(वँ) वृन्दः(स्) स्या- दकारोऽप्यस्तिवाचकः ।
सखिवृन्दोऽस्ति यस्याश्च, सा वृन्दा परिकीर्तिता ।।14।।

वृन्दावने विनोदश्च, सोऽस्या ह्यस्ति च तत्र वै ।
वेदा वदन्ति तां(न्) तेन, वृन्दावनविनोदिनीम् ।।15।।

नखचन्द्रावलीवक्त्र- चन्द्रोऽस्ति यत्र संततम् ।
तेन चन्द्रावली सा च, कृष्णेन परिकीर्तिता ।।16।।

कान्तिरस्ति चन्द्रतुल्या, सदा यस्या दिवानिशम् ।
मुनिना कीर्तिता तेन, शरच्चन्द्रप्रभानना ।।17।।

## फलश्रुति

इदं षोडशनामोक्त- मर्थव्याख्यानसंयुतम् ।
नारायणेन यद्दत्तं , ब्रह्मणे नाभिपङ्कजे ।।18।।

ब्रह्मणा च पुरा दत्तं(न्) ,धर्माय जनकाय मे ।
धर्मेण कृपया दत्तं, मह्यमादित्यपर्वणि ।
पुष्करे च महातीर्थे पुण्याहे देवसंसदि ।।19।।
राधाप्रभावप्रस्तावे, सुप्रसन्नेन चेतसा ।
इदं स्तोत्रं महापुण्यं(न्), तुभ्यं(न्) दत्तं मया मुने ।।20।।

निन्दकायावैष्णवाय , न दातव्यं महामुने ।
यावज्जीवमिदं स्तोत्रं(न्) त्रिसन्ध्यं(यँ) यः(फ्) पठेन्नरः ।।21।।

राधामाधवयोः(फ्) पाद- पद्मे भक्तिर्भवेदिह ।
अन्ते लभेत्तयोर्दास्यं, शश्वत्सहचरो भवेत् ।।22।।

अणिमादिकसिद्धिं(ञ्) च, संप्राप्य नित्यविग्रहम् ।
व्रतदानोपवासैश्च, सर्वैर्नियमपूर्वकैः।।23।।

चतुर्णां(ञ्) चैव वेदानां, पाठः(स्) सर्वार्थसंयुतैः।
सर्वेषां(यँ) यज्ञतीर्थानां(ङ्), करणैर्विधिबोधितैः।।24।।

प्रदक्षिणेन भूमेश्च, कृत्स्नाया एव सप्तधा ।
शरणागतरक्षाया- मज्ञानां(ञ्) ज्ञानदानतः।।25।।

देवानां(वँ) वैष्णवानां(ञ्) च , दर्शनेनापि यत् फलम् ।
तदेव स्तोत्रपाठस्य , कलां(न्) नार्हति षोडशीम् ।
स्तोत्रस्यास्य प्रभावेण, जीवन्मुक्तो भवेन्नरः।।26।।

इति श्रीब्रह्मवैवर्तपुराणे श्रीकृष्णजन्मखण्डे श्रीनारायणकृतम्
राधाषोडशनामस्तोत्रम् सम्पूर्णम् ।।

## ॥ युगल स्तुति ॥

जय राधे जय राधे राधे, जय राधे जय श्री राधे।
जय कृष्ण जय कृष्ण कृष्ण, जय कृष्ण जय श्री कृष्ण॥

श्यामा गौरी नित्य किशोरी, प्रीतम जोरी श्री राधे।
रसिक रसीलो छैल छबीलो, गुण गर्वीलो श्री कृष्ण॥1।।

रासविहारिणी रसविस्तारिणी, प्रिय उर धारिणी श्री राधे।
नव-नवरंगी नवल त्रिभंगी, श्याम सुअंगी श्री कृष्ण॥2।।

प्राण पियारी रूप उजियारी, अति सुकुमारी श्री राधे।
कीरतिवन्ता कामिनीकन्ता, श्री भगवन्ता श्री कृष्ण॥3।।

शोभाशयनी मोहानयनी, कोकिलबयनी श्री राधे।
नैन मनोहर महामोदकर, सुन्दरवरतर श्री कृष्ण॥4।।

चन्द्राबदनी वृन्दारकनी, शोभासदनी श्री राधे।
परम उदारा प्रभा अपारा, अति सुकुमारा श्री कृष्ण॥5।।

हंसा गमनी राजत रमनी, क्रीड़ा कमनी श्री राधे।

रूप रसाला नयन विशाला, परम कृपाला श्री कृष्ण।।6।।

रंजनबेली रतिरसहेली, अति अलबेली श्री राधे।
सब सुखसागर सब गुण आगर, रूप उजागर श्री कृष्ण॥7।।

रमणीरम्या तरुणीगम्या, भक्ताकम्या श्री राधे।
धाम निवासी प्रभा प्रकाशी, सहज सुहासी श्री कृष्ण॥8।।

शक्त्याह्लादिनि अतिप्रियवादिनि, उरउन्मादिनि श्री राधे।
अंग-अंग टोना सरस सलोना, सुभग सुछौना श्री कृष्ण।।9।।

गौरलभामिनि गुणअभिरामिनि, हरिप्रियास्वामिनी श्री राधे।
गोपी प्रियतम यशोमति हियसम, वृंदावनरम श्री कृष्ण।।10।।

जय राधे जय राधे राधे, जय राधे जय श्री राधे।
जय कृष्ण जय कृष्ण कृष्ण, जय कृष्ण जय श्री कृष्ण॥

